# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

कक्षा – शास्त्री – १ (Sem-1) प्रश्नपत्रम् – ८ गुणाः - ७०

विषयः – पुराणेतिहासः कोड – C.E. – 1.1.2 समयः ११- ३० तः २ - ३०

दिनाङ्कः – १७/१०/२०१९ सन्दर्भग्रन्थः – वाल्मिकीयरामायणे सुन्दरकाण्डः - १ तः ३४ सर्गाः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते भावार्थो लेख्यः।** १०

१ प्रविश्य नगरीं लङ्कां कपिराजहितंकरः।
चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि॥

२ मार्गमाणस्तु वैदेहीं सीतामायतलोचनाम्।
सर्वतः परिचक्राम हनूमानरिसूदनः॥

३ त्वं हि देववरिष्टम्य मारुतस्य महात्मनः।
पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर॥

**प्रश्नः – २ कस्याप्येकस्य सविस्तरमुत्तरं लिखत।** १०

(१) पुष्पकविमानस्य वर्णनम्।

(२) लङ्कायाः वर्णनम्।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ निम्नलिखितेषु श्लोकेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या।** १०

१ राक्षसाधम रामस्य भार्याममिततेजसः।
उक्तवानसि यत् पापं क्व गतस्तस्य मोक्ष्यसे॥

२ स्वधर्मो रक्षसां भीरु सर्वदैव न संशयः।
गमनं वा परस्त्रीणां हरणं संप्रथ्य वा॥

३ मार्गमाणो वररोहां राजपुत्रीमनिन्दिताम्।
सुखप्रसुप्तान् विहगान् बोधयामास वानरः॥

**प्रश्नः – ४ श्रीमद् वाल्मीकीयरामायणे सुन्दरकाण्डान्तर्गते षोडशः सर्गस्य सविस्तरेण वर्णनं कुरुत।** १०

**अथवा**

**हनुमताकृतम् अशोकवाटिकायां सीतादर्शनम्।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५ अधस्तनेषु श्लोकेषु कयोरपि द्वयोः श्लोकयोः सन्दर्भप्रसङ्गं संस्कृते भावार्थो लेख्यः |** १०

१ किं नु चन्द्रमसा हीना पतिता विबुधालयात् |
रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणाधिका ||

२ दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः |
तं नित्यमनुरक्तास्मि यथा सूर्ये सुवर्चला ||

३ प्रियां बहुमतां भार्यो वनवासमनुव्रताम् |
भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ||

**प्रश्नः – ६ सीताद्वारा हनुमते स्वपरिचयपूर्वकं वनगमनं तथा च अपहरणस्य वृत्तान्तं वर्णयन्तु |** १०

**अथवा**

**त्रिजटायाः स्वप्नद्वारा राक्षसानां विनाशः श्रीरघुनाथस्य विजयस्य च शुभसूचनां वर्णयन्तु |**

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः – ७ निम्नलिखितेषु प्रश्नेषु दशप्रश्नानां लघूत्तराणि प्रदेयानि |** १०

(१) श्रीमद् वाल्मीकीयरामायणान्तर्गते सुन्दरकाण्डे कति सर्गाः सन्ति ?
(२) सुरसा का आसीत् ?
(३) हनुमतः पितुः नाम किम् ?
(४) कस्य नाम राघवः ?
(५) कस्याः नाम जनकात्मजा ?
(६) रावणस्य पत्न्याः नाम किम् ?
(७) अशोकवाटिकायाः अपरं नाम किम् ?
(८) रामायणस्य कोऽर्थः ?
(९) केन रूपेण हनुमान् लङ्कां प्रविशति ?
(१०) सुन्दरकाण्डस्य कोऽर्थः ?
(११) रावणान्तः पुरे का न दृश्यते ?
(१२) रावणस्य पितुः नाम किम् ?
(१३) हरियूथपः कस्य नाम अस्ति ?
(१४) सीता हनुमते किं ददाति ?
(१५) सीतायाः मातुः नाम किम् ?

***